# शब्दान्तरपूर्विका द्वितीया- उपपदविभक्तिः

## अन्तरान्तरेणयुक्ते

- अन्तरा = मध्ये, अन्तरेण = विना - इत्येतयोः योगे द्वितीया भवति।

**अन्तरा त्वां मां हरिः।**

**अन्तरेण हरिं न सुखम्।**

- **विशेषः** - 'योगे' इत्यस्य तात्पर्यम् अर्थतः योगे इति, न तु शब्दत एव। अतः विशेषतया सूत्रे 'युक्ते' इति पठितम्। तस्मात् कारणात् - ' **त्वां माम् अन्तरा कृष्णस्य मूर्तिः**' इत्यत्र कृष्णशब्दात् न द्वितीया।
- अन्तरा-अन्तरेण इत्यनयोः परस्परं साहचर्यात् द्वावपि अव्ययशब्दौ एव गृह्येते, न तु टाबन्तः तृतीयान्तः च।

# कर्मप्रवचनीयाः

इदम् अधिकारसूत्रम्। **'विभाषा कृञि ( १/४/९८ )** इति यावद् अधिकारः। महासंज्ञात्वाद् इयम् अन्वर्थसंज्ञा- कर्म(क्रियां) प्रोक्तवन्तः = कर्मप्रवचनीयाः। (कर्तरि भूते अनीयर्प्रत्ययः) अतः तात्पर्यार्थः फलति- ये प्राक् क्रियामुक्तवन्तः, अधुना तु क्रियाकृतं विशेषसम्बन्धं बोधयन्ति- ते कर्मप्रवचनीयाः कथ्यन्ते।

**यथा हि महाभाष्ये- कर्म प्रोक्तवन्तः कर्मप्रवचनीया इति। के पुनः कर्म प्रोक्तवन्तः? ये सम्प्रति क्रियां नाहुः, ये अप्रयुज्यमानस्य क्रियाम् आहुः।**

**१.लक्ष्मणः रामम् अनुगच्छति** - अत्र 'अनुः' क्रियां कथयति। अतः न कर्मप्रवचनीयत्वम्।

**२. जपम् अनु प्रावर्षत् ( हेतुभूतजपोपलक्षितं वर्षणम् )** - अत्र 'अनुः' वर्षां प्रति जपस्य लक्षणत्वं हेतुत्वं च द्योतयति।

अत आचार्यो भर्तृहरिः कथयति-

**क्रियाया द्योतको नायं सम्बन्धस्य न वाचकः।**
**नापि क्रियापदापेक्षी सम्बन्धस्य तु द्योतकः।।**

# कर्मप्रवचनीययोगे द्वितीया

## अनुर्लक्षणे

**सूत्रार्थः** – हेतुरूपे लक्ष्यलक्षणभावसम्बन्धे द्योत्ये अनुः कर्मप्रवचनीयसंज्ञको भवति।

अत्र 'अनुः' हेतुरूपार्थद्योतकः, अतः 'जपः' वर्षणं प्रति हेतुः भवति, तथापि 'हेतौ' तृतीया तु न भवति। विशेषसूत्रारम्भात्।

## कर्मप्रवचनीययुक्ते द्वितीया

**सूत्रार्थः** – कर्मप्रवचनीयसंज्ञकानां योगे द्वितीया विभक्तिः भवति।

**उदाहरणम्**– जपम् अनु प्रावर्षत्।

**एकादश कर्मप्रवचनीयाः अष्टाध्याय्यां निर्दिष्टाः** –

अनु, उप, अप, परि, आङ्, प्रति, अभि, अधि, सु, अति, अपि।

# कर्मप्रवचनीययोगे द्वितीया

## तृतीयार्थे

सूत्रार्थः – तृतीयार्थे द्योत्ये अनुः कर्मप्रवचनीसंज्ञको भवति।

तृतीयार्थस्तु अत्र 'सहयुक्तेऽप्रधाने इति साहित्यरूपः।

अनेन सूत्रेण कर्मप्रवचनीयसंज्ञायां 'कर्मप्रवचनीययुक्ते द्वितीया' इति द्वितीया जायते।

यथा– **नदीम् अनु अवसिता सेना।**

## हीने

सूत्रार्थः – हीनार्थे द्योत्ये अनुः कर्मप्रवचनीसंज्ञको भवति।

अनेन सूत्रेण कर्मप्रवचनीयसंज्ञायां 'कर्मप्रवचनीययुक्ते द्वितीया' इति द्वितीया जायते।

यथा– **अनु हरिं सुराः।**

'हरेः निकृष्टाः देवताः' इति तात्पर्यम्।

# उपोऽधिके च

**सूत्रार्थः - अधिके हीने च अर्थे द्योत्ये उपः कर्मप्रवचनीयसंज्ञको भवति।**

**विशेषः -**

✓उपेन यदा हीनार्थः द्योत्यते, तदा द्वितीया भवति।

यथा- उप हरिं सुराः। 'हरेः निकृष्टाः' इत्यर्थः।

✓उपेन यदा अधिकार्थः द्योत्यते, तदा सप्तमी भवति- 'यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी' इति सूत्रेण।

यथा- उप परार्धे हरेर्गुणाः।

# लक्षणेत्थम्भूताख्यानभागवीप्सासु प्रतिपर्यनवः

**सूत्रार्थः - लक्षण-इत्थम्भूताख्यान-भाग-वीप्सासु अर्थेषु विषयभूतेषु प्रति-परि-अनवः कर्मप्रवचनीसंज्ञकाः भवन्ति।**

**लक्षणम् = ज्ञापकम्** - वृक्षं प्रति विद्योतते विद्युत्। वृक्षस्य पार्श्वे विद्युत् अस्ति। वृक्षं दृष्ट्वा तत्समीपस्थायाः विद्युतः ज्ञानं भवति।

**इत्थम्भूताख्यानम् = अयं प्रकारः - इत्थम्, तं प्राप्तः - इत्थम्भूतः, तस्य आख्यानम् - इत्थम्भूताख्यानम्, तस्मिन्।**

अयं भक्तो विष्णुं प्रति परि अनु वा। अयं जनः विष्णुविषयकभक्तिमान् सञ्जातः।

**भागः = अंशः।** लक्ष्मीः हरिं प्रति परि अनु वा। लक्ष्मीः हरेः भागः अस्ति।

**वीप्सा = कात्स्न्र्येन सम्बद्धुम् इच्छा, बारम्बारम्।**

- वृक्षं वृक्षं प्रति परि अनु वा सिञ्चति। सर्वान् वृक्षान् एकैकं सिञ्चति।